Subrahmanya Ashtakam

सुब्रह्मण्याष्टकम्

NityaPaath
nityapaath.com/subrahmanya-karavalamba/

SHLOKA · श्लोकः

1 हे स्वामिनाथ करुणाकर दीनबंधो श्रीपार्वतीशमुखपंकजपद्मबंधो ।
श्रीशादिदेवगणपूजितपादपद्म वल्लीसनाथ मम देहि करावलंबम् ॥

2 देवाधिदेवसुत देवगणाधिनाथ देवेंद्रवंद्य मृदुपङ्कजमंजुपाद ।
देवर्षिनारदमुनींद्रसुगीतकीर्ते वल्लीसनाथ मम देहि करावलंबम् ॥

3 नित्यान्नदाननिरताखिलरोगहारिन् भाग्यप्रदानपरिपूरितभक्तकाम ।
श्रुत्यागमप्रणववाच्यनिजस्वरूप वल्लीसनाथ मम देहि करावलंबम् ॥

4 क्रौञ्चासुरेन्द्रपरिखंडन शक्तिशूलचापादिशस्त्रपरिमंडितदिव्यपाणे ।
श्रीकुंडलीशधरतुण्डशिखींद्रवाह वल्लीसनाथ मम देहि करावलंबम् ॥

5 देवाधिदेवरथमंडलमध्यवेद्य देवेंद्रपीडनकरं दृढचापहस्तम् ।
शूरं निहत्य सुरकोटिभिरीड्यमान वल्लीसनाथ मम देहि करावलंबम् ॥

6 हारादिरत्नमणियुक्तकिरीटहारकेयूरकुंडललसत्कवचाभिरामम् ।
हे वीर तारकजयामरवृंदवंद्य वल्लीसनाथ मम देहि करावलंबम् ॥

7 पञ्चाक्षरादिमनुमंत्रितगाङ्गतोयैः पञ्चामृतैः प्रमुदितेन्द्रमुखैर्मुनीन्द्रैः ।
पट्टाभिषिक्तहरियुक्त परासनाथ वल्लीसनाथ मम देहि करावलंबम् ॥

8 श्रीकार्तिकेय करुणामृतपूर्णदृष्ट्या कामादिरोगकलुषीकृतदुष्टचित्तम् ।
सिक्त्वा तु मामव कलाधरकांतिकांत्या वल्लीसनाथ मम देहि करावलंबम् ॥

Text checked against: Brihat Stotra Ratnakara, Part 2, ed. Narayan Ram Acharya Kavyatirtha, Nirnaya Sagar Press, Bombay (no. 406 सुब्रह्मण्याष्टकम्). Meanings, audio and all scripts at nityapaath.com/subrahmanya-karavalamba/